# mAheshvarakavacham

# માહેશ્વરકવચમ્

## Document Information

Text title : mAheshvarakavacham

File name : mAheshvarakavacham.itx

Category : kavacha, shiva

Location : doc_shiva

Author : Traditional

Transliterated by : Nat Natarajan nat.natarajan at gmail.com

Proofread by : Nat Natarajan nat.natarajan at gmail.com, NA

Latest update : March 20, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# માહેશ્વરકવચમ્

॥ અથ માહેશ્વરકવચમ્ ॥

ૐ નમોભગવતે રુદ્રાય ।
રાજોવાચ ।
અઙ્ગન્યાસં યદુક્તંભો મહેશાક્ષર સંયુતમ્ ।
વિધાનં કીદૃશં તસ્ય કર્તવ્યં કેન હેતુના ॥ ૧॥

તદ્વદસ્વ મહાભાગ વિસ્તરેણ મમાગ્રતઃ ।
ભૃગુરુવાચ ।
કવચં મહેશ્વરં રાજન્ દેવૈરપિ સુદુર્લભમ્ ॥ ૨॥

યઃ કરોતિ સ્વગાત્રેષુ પૂતાત્મા સંભવેન્નરઃ ।
કૃત્વા ન્યાસમિમં યસ્તુ સઙ્ગ્રામ પ્રવિશેન્નરઃ ॥ ૩॥

ન શરાસ્તોમરાસ્તસ્ય ખડ્ગશક્તિ પરશ્વધાઃ ।
પ્રભવન્તિ રિપોઃ ક્વાપિ ભવેચ્છિવપરાક્રમઃ ॥ ૪॥

વ્યાધિગ્રસ્તસ્તુ યઃ કશ્ચિત્કારયેચ્ચૈવમાર્જનમ્ ।
એકાદશકુશૈઃ સાગ્રૈર્મુક્તોભવતિ નાન્યથા ॥ ૫॥

ન ભૂતા ન પિશાચાશ્ચ કૂષ્માણ્ડા ન વિનાયકાઃ ।
શિવસ્મરણમાત્રેણ ન વિશન્તિ કલેવરે ॥ ૬॥

ૐ નમઃ પઞ્ચવક્ત્રાય શશિસોમાર્કનેત્રાય
ભયાર્ત્તાનામભયાય મમ સર્વગાત્રરક્ષાર્થે વિનિયોગઃ
ૐ હ્રૌં હ્રાં હ્રૂં મન્ત્રેણાનેન
વૃષગોમયભસ્મનામ્ આમન્ત્ર્યલલાટે તિલકમાદાય પઠેત્ ॥

ત્રાહિ માં દેવ દુષ્પ્રેક્ષ્ય શત્રૂણાંભયવર્ધન ।
ૐ સ્વચ્છન્દભૈરવઃ પ્રાચ્યામાગ્નેય્યાં - શિખિલોચનઃ ॥ ૭॥

ભૂતેશો દક્ષિણે ભાગે નૈરૃત્યાં ભીમદર્શનઃ ।
વારુણે વૃષકેતુશ્ચ વાયૌ રક્ષતુ શઙ્કરઃ ॥ ૮॥

દિગ્વાસાઃ સૌમ્યતો નિત્યમૈશાન્યાં મદનાન્તકઃ ।
વામદેવ ઊર્ધ્વતો રક્ષેદઘોરક્ષેત્ત્રિલોચનઃ ॥ ૯॥

પુરારિઃ પુરતઃ પાતુ કપર્દી પાતુ પૃષ્ઠતઃ ।
વિશ્વેશો દક્ષિણે ભાગે વામે કાલીપતિઃ સદા ॥ ૧૦॥

માહેશ્વરઃ શિરોભાગે ભવો ભાલે સદાવતુ ।
ભ્રુવોર્મધ્યે મહાતેજાસ્ત્રિનેત્રો નેત્રયોર્દ્વયોઃ ॥ ૧૧॥

પિનાકી નાસિકા દેશે કર્ણયોર્ગિરિજાપતિઃ ।
ઉગ્રઃ કપોલતો રક્ષેન્મુખદેશે મહાભુજઃ ॥ ૧૨॥

જિહ્વાયામન્ધકધ્વંસી દન્તાન્રક્ષતુ મૃત્યુજિત્ ।
નીલકણ્ઠઃ સદાકણ્ઠે પૃષ્ઠે કામાઙ્ગનાશનઃ ॥ ૧૩॥

ત્રિપુરારિઃ સ્કન્ધદેશે બાહ્વોશ્ચ ચન્દ્રશેખરઃ ।
હસ્તિચર્મધરો હસ્તે નખાઙ્ગુલિષુ શૂલભૃત્ ॥ ૧૪॥

ભવાનીશઃ પાતુ હૃદયં પાતૂદરકટીર્મૃડઃ ।
ગુદે લિઙ્ગે ચ મેઢ્રે ચ નાભૌ ચ પ્રમથાધિપઃ ॥ ૧૫॥

જઙ્ઘોરુચરણે ભીમઃ સર્વાઙ્ગેકેશવપ્રિયઃ ।
રોમકૂપે વિરૂપાક્ષઃ શબ્દે સ્પર્શેચ યોગવિત્ ॥ ૧૬॥

રક્તમજ્જાવસામાસશુક્રેવસુગણાર્ચિતઃ ।
પ્રાણાપાનસમાનેષુદાનવ્યાનેષુધૂર્જટીઃ ॥ ૧૭॥

રક્ષાહીનન્તુયત્સ્થાનં વર્જિતં કવચેન યત્ ।
તત્સર્વં રક્ષમે દેવ વ્યાથિદુર્ગજ્વરાદિતઃ ॥ ૧૮॥

કાર્યં કર્મ ત્વિદં પ્રાજ્ઞૈર્દીપં પ્રજ્વાલ્ય સર્પિષા ।
નિવેદ્ય શિખિનેત્રાય વારયેચ્ચોત્તરં મુખમ્ ॥ ૧૯॥

જ્વરદાહપરિક્રાન્તં તથાન્યવ્યાધિસંયુતમ્ ।
કુશૈઃસંમાર્જ્ય સમાર્જ્યક્ષિપેદ્દીપશિખેજ્વરમ્ ॥ ૨૦॥

ઐકાહિકં દ્વ્યાહિકં વા તૃતીયકચતુર્થકમ્ ।
વાતપિત્તકફોદ્ભૂતં સન્નિપાતોગ્રતેજસમ્ ॥ ૨૧॥

અન્યદ્દુઃખદુરાધર્ષં કર્મ ચાભિચારિકમ્ ।
ધાતુસ્થં કફસંમિશ્રં વિષમ કામસમ્ભવમ્ ॥ ૨૨॥

ભૂતાભિષઙ્ગસગર્તં ભૂતચેષ્ટાદિસસ્થિતમ્ ।
શિવાજ્ઞાં ઘોરમન્ત્રેણ પૂર્વવૃત્તં સ્વયં સ્મર ॥ ૨૩॥

જહિ દેહં મનુષ્યસ્ય દીપં ગચ્છ મહાજ્વર ।
કૃત્વા તુ કવચં દિવ્યં સર્વવ્યાધિભયાર્દનમ્ ॥ ૨૪॥

ન બાધન્તે વ્યાધયસ્તં બાલગ્રહભયાશ્ચ યે ।
લૂતાવિસ્ફોટકં ઘોરશિરોર્ત્તિચ્છર્દ્દિવિગ્રહમ્ ॥ ૨૫॥ ??
કામલાક્ષયકાસઞ્ચ ગુલ્માશ્મરિભગન્દરાન્ ।
શૂલોન્માદઞ્ચહૃદ્રોગં યકૃતં પાણ્ડુવિદ્રધિમ્ ॥ ૨૬॥

અતિસારાદયોરોગા ડાકિનીગ્રહપીડિતામ્ ।
પામાવિચર્ચિકાદ્દ્રુકુષ્ઠવ્યાધિવિષાર્દનમ્ ॥ ૨૭॥

સ્મરણાન્નાશયત્યાશુ કવચં શૂલપાણિનઃ ।
યસ્તુ સ્મરતિ નિત્યં વૈ યસ્તુ ધારયતે નરઃ ॥ ૨૮॥

સમુક્તઃ સર્વપાપેભ્યો વસેચ્છિવપુરે ચિરમ્ ।
સખ્યવ્રતસ્ય દાનસ્ય યજ્ઞસ્યાસ્તીવ શાસ્ત્રતઃ ॥ ૨૯॥

ન સઙ્ખ્યા વિદ્યતે શમ્ભોઃ સર્વકામફલપ્રદમ્ ॥ ૩૦॥

શ્રોતવ્યં સતતં ભક્ત્યા કવચં સર્વકામિકમ્ ।
લિખિતં તિષ્ઠતે યસ્ય ગૃહે સમ્યગનુત્તમમ્ ॥ ૩૧॥

ન તત્ર કલહોદ્વેગં નાકાલમરણંભવેત્ ।
નાલ્પપ્રજાઃ સ્ત્રિયસ્તત્ર ન દૌર્ભાગ્યસમાશ્રિતાઃ ॥ ૩૨॥

તસ્માન્માહેશ્વરં નામ કવચં સુરગણાર્ચિતમ્ ।
શ્રોતવ્યં પઠિતવ્યઞ્ચ મન્તવ્યં ભાવુકપ્રદમ્ ॥ ૩૩॥

માહેશ્વરસ્ય કવચં સર્વવ્યાધિનિષૂદનમ્ ।
યઃ પઠેચ્ચેન્નરો નિત્યં સવ્રજેચ્છાઙ્કરં પુરમ્ ॥ ૩૪॥

ઇતિ શ્રીમાહેશ્વરકવચં સમ્પૂર્ણમ્ ॥

Proofread by Nat Natarajan, NA

*mAheshvarakavacham*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*